# सुरभिः

## ( प्रवेशिका )

( कक्षा-पाँचवीं )



प्रकाशन विभाग

**डी.ए.वी. कॉलेज प्रबंधकर्त्री समिति**

चित्रगुप्त मार्ग, नई दिल्ली-110055

# विषय-सूची


| क्र.सं. | पाठ | पृ. सं. |
|---|---|---|
| | • परिचय: | |
| | • शिष्टाचार: | |
| | • हे प्रभो! | 1 |
| 1. | मधुरा प्रभातवेला | 2 |
| 2. | मम परिवार: | 7 |
| 3. | वयम् पश्याम: जन्तुशालाम् | 12 |
| 4. | शाकहट्टम् | 19 |
| 5. | अस्माकम् प्रियमित्राणि (पक्षिण:) | 23 |
| 6. | ये फलानि खादन्ति ते सुखिन: वसन्ति | 28 |
| 7. | चित्रप्रदर्शनी | 32 |
| 8. | अभिनव: किम् किम् करोति? | 35 |
| 9. | विडाल: कुत्र अस्ति? | 40 |
| 10. | आगच्छ! गायाम: | 43 |
| 11. | हरिणम् मा मारय! | 47 |
| 12. | कथयन्तु! कस्य क: वर्ण:? | 51 |
| 13. | क: चतुर: अस्ति? | 57 |
| 14. | कति वस्तूनि सन्ति? | 60 |
| | • सङ्ख्या | 64 |
| | • इदम् अस्माकं शरीरम् | 66 |

# शिष्टाचारः






| | | | |
|---|---|---|---|
| सुप्रभातम् | – | प्रातः का नमस्कार। | (Good Morning) |
| सुमध्याह्नम् | – | दोपहर का नमस्कार। | (Good Afternoon) |
| शुभसायम् | – | सायंकाल का नमस्कार। | (Good Evening) |
| शुभरात्रिः | – | रात का नमस्कार। | (Good Night) |
| धन्यवादः | – | धन्यवाद। | (Thank You) |
| स्वागतम् | – | स्वागत है। | (Welcome) |
| कृपया | – | कृपया। | (Please) |
| समीचीनम् | – | बहुत अच्छा। | (Very Good) |
| अस्तु | – | ठीक है। | (All Right) |
| क्षम्यताम् | – | क्षमा करें। | (Excuse Me) |
| पुनः मिलामः | – | फिर मिलते हैं। | (See you again) |


# हे प्रभो!




**महयम्** सद्‌बुद्धिम् **यच्छ**,
सत्कार्याणि **करिष्यामि**।



महयम् शरीरबलम् प्रयच्छ,
अन्येषाम् रक्षाम् करिष्यामि।





महयम् मधुरवाणीम् प्रयच्छ,
सदैव मधुरम् **वदिष्यामि**।



महयम् श्रवणशक्तिम् प्रयच्छ,
हितवचनानाम् श्रवणम् करिष्यामि।


***एषः पाठः केवलं प्रार्थना-रूपेण कक्षायां सस्वरं पठनाय न तु अभ्यासाय।***

**शब्दार्थ–महयम्**=मुझे (to me), **यच्छ**=दो (give), **करिष्यामि**=करूँगा/करूँगी ((I) will do), **वदिष्यामि**=बोलूँगा/बोलूँगी ((I) will speak)

**प्रथमः पाठः**

# मधुरा प्रभातवेला





अहा! **मधुरा** प्रभातवेला। आकाशे सूर्यः उदितः। अन्धकारः गतः। सर्वत्र प्रकाशः एव प्रकाशः **अस्ति**। खगाः आकाशे **अत्र-तत्र** भ्रमन्ति। वृक्षेषु वानराः कूर्दन्ति। जनाः प्रसन्नाः **सन्ति**। **ते** उद्यानेषु भ्रमन्ति धावन्ति च। बालाः **अपि** उद्यानेषु क्रीडन्ति। पशवः अपि प्रसन्नाः सन्ति। ते वनेषु अत्र-तत्र गच्छन्ति। **सर्वे** जनाः **स्वकार्येषु** संलग्नाः भविष्यन्ति।

अहा! धन्या **एषा** सुखदायिनी प्रभातवेला।


---


**शब्दार्थ–मधुरा**=सुहावनी (pleasant), **अस्ति**=है (is), **अत्र-तत्र**=यहाँ-वहाँ (here-there), **सन्ति**=हैं (are), **ते**=वे (they), **अपि**=भी (too), **सर्वे**=सब (all), **स्वकार्येषु**=अपने कामों में (in their own works/jobs), **एषा**=यह (एक) (स्त्रीलिङ्ग)(this (one)) (feminine)

## अभ्यासः

1. चित्राणि दृष्ट्वा रिक्तस्थानानि पूरयत–

(क) आकाशे ......सूर्यः...... उदितः।






(ख) ......खगाः...... आकाशे उड्डयन्ति।

(ग) ......बालाः...... क्रीडन्ति।





(घ) ......वानराः...... वृक्षेषु कूर्दन्ति।

2. **उदाहरणम् पठित्वा प्रश्नानाम् उत्तराणि लिखत 'आम्' अथवा 'न'–**

**उदाहरणम्–**किम् प्रभातवेला मधुरा अस्ति? ........आम्........

(क) किम् सूर्यः प्रभातवेलायाम् उदितः भवति? ........आम्........

(ख) किम् प्रातः वानराः अपि प्रसन्नाः भवन्ति? ........आम्........

(ग) किम् बालाः उद्यानेषु क्रीडन्ति? ........आम्........

(घ) किम् वानराः आकाशे भ्रमन्ति? ........न........

(ङ) किम् प्रभातवेला सुखदायिनी अस्ति? ........आम्........

3. **चित्रं दृष्ट्वा वदन्तु लिखन्तु च सत्यम्/असत्यम् वा–**



**यथा–** सूर्यः उदितः अस्ति। ........सत्यम्........

(क) वानराः वृक्षस्य अधः सन्ति। ........असत्यम्........

(ख) बालकाः धावन्ति। ........सत्यम्........

(ग) पुष्पाणि सन्ति। ........सत्यम्........

(घ) द्वौ कुक्कुरौ स्तः। ........असत्यम्........

4. चित्रं दृष्ट्वा वदन्तु 'आम्' अथवा 'न'–

किं चित्रे–

(क) पर्वतः अस्ति?

(ख) नदी अस्ति?

(ग) हंसः अस्ति?

(घ) सिंहः अस्ति?

(ङ) बालः अस्ति?

(च) कुक्कुरः अस्ति?

(छ) नौका अस्ति?


(ज) पत्रम् अस्ति?

(झ) बालिका अस्ति?

(ञ) वृक्षः अस्ति?




5. उपरिदत्तं चित्रं दृष्ट्वा नामानि लिखन्तु–

(क)  ........................ चन्द्रः




(ख) ............................................ खगः

(ग)  ............................................ नौका



(घ) ............................................ पुष्पम्



(ङ) ............................................ हंसः

द्वितीयः पाठः

# मम परिवारः



**निशा** – मधुर! अत्र आगच्छ। पश्य, **इदम्** चित्रम्।

(मधुरः चित्रम् पश्यति)

**मधुरः** – अहा! इदम् मम चित्रम् अस्ति।

**निशा** – भवान् कथम् अवगच्छति?

**मधुरः** – पश्यतु एषः अहम्।

**निशा** – एषः कः?



**मधुरः** – एषः मम पिता।

**निशा** – एषा का?

**मधुरः** – एषा मम माता।

**निशा** – एषः कः?

**मधुरः** – एषः मम अनुजः।

**निशा** – एषः कः?



**मधुरः** – एषः मम ज्येष्ठः भ्राता।

**निशा** – मधुर! अधुना **अवगच्छामि** एषः तव पिता, एषा तव माता, एषः तव अनुजः, एषः ज्येष्ठः भ्राता।

---

**शब्दार्थ–इदम्**=यह (एक) (this (one)), **अवगच्छामि**=समझता हूँ/समझती हूँ ((I) understand)

## अभ्यासः

1. अधोलिखितानि रिक्तस्थानानि पूरयन्तु–



(क) एषः कः अस्ति?

एषः ............ पुरुषः अस्ति।



(ख) एषा का अस्ति?

एषा ............ महिला अस्ति।



(ग) एषः कः अस्ति?

एषः ............ चिकित्सकः अस्ति।



(घ) एषा का अस्ति?

एषा ............ चिकित्सिका अस्ति।



(ङ) एषः कः अस्ति?

एषः ............ नर्तकः अस्ति।



(च) एषा का अस्ति?

एषा ............ नर्तकी अस्ति।



(छ) एषः कः अस्ति?

एषः ............ अध्यापकः अस्ति।



(ज) एषा का अस्ति?

एषा ............ अध्यापिका अस्ति।

2. **चित्राणि दृष्ट्वा रिक्तस्थानानि पूरयन्तु–**

(क) एषः ..........कः.......... अस्ति?

एषः लेखकः अस्ति।

लेखकः किम् करोति?

..........लेखकः.......... लिखति।



(ख) एषा ..........का.......... अस्ति?

एषा महिला अस्ति।

महिला किम् करोति?

..........महिला.......... पचति।




(ग) एतत् ..........किम्.......... अस्ति?

एतत् फलम् अस्ति।

किम् फलम् पतति?

आम्‌ ..........फलम्.......... पतति।



(घ) एषः ..........कः.......... अस्ति?


एषः सैनिकः अस्ति।

सैनिकः किम् करोति?

..........सैनिकः.......... देशम् रक्षति।



3. चित्रे किं किम् अस्ति इति वदन्तु लिखन्तु च–






व्यजनम्
दीपकः
वस्त्रम्
दर्पणः
चित्रम्
द्वारम्
पादत्राणम्
कन्दुकम्
घटः
भूषणम्
पुस्तकम्
लेखनी
चमसः
घटिका
अग्निः

4. किं भवतः/भवत्याः गृहे 'अस्ति/नास्ति' इति लिखन्तु–

(क) लेखनी अस्ति? अस्ति
(ख) घटः अस्ति? अस्ति
(ग) द्वारम् अस्ति? अस्ति
(घ) चित्रम् अस्ति? अस्ति
(ङ) दर्पणः अस्ति? अस्ति
(च) पादत्राणम् अस्ति? अस्ति


5. नामानि लिखत–

(क)  ........................ व्यजनम्

(ख) ........................ दर्पणः 

(ग)  ........................ पुस्तकम्

(घ) ........................ दीपकः 

(ङ)  ........................ कन्दुकम्

(च) ........................ वस्त्रम् 

**तृतीयः पाठः**

# वयम् पश्यामः जन्तुशालाम्

**नवीनः, प्रवीणः, समृद्धिः, नीना च एकदा भ्रमणाय गच्छन्ति।**



**नवीनः** – एषा का अस्ति?

**प्रवीणः** – एषा जन्तुशाला अस्ति।

**नवीनः** – किम् अत्र अनेके जीवाः सन्ति?


**प्रवीणः** – आम्, अत्र अनेके जीवाः सन्ति।


**नवीनः** – ते किम् कुर्वन्ति?

**प्रवीणः** – पश्य तत्र–

सिंहः गर्जति,
अश्वः धावति,
गजः चलति,
मृगः शीघ्रम् धावति,
वानरः खादति,
अजः चरति।







(तदा समृद्धिः नीना च आगच्छतः।)





समृद्धिः – एते के सन्ति?

नीना – एते खगाः सन्ति।

समृद्धिः – खगाः किम् कुर्वन्ति?

नीना – एषः मयूरः नृत्यति, एषः शुकः खादति, पिकः कूजति, कपोतः उत्पतति, उलूकः तिष्ठति, सा सारिका गायति।







(सर्वे भ्रमन्ति।)


नवीनः – तत्र किम् अस्ति?

प्रवीणः – तत्र सरोवरः अस्ति।

नवीनः – एते के तरन्ति?

प्रवीणः – एते जलजीवाः तरन्ति।


नवीनः – अत्र मकरः, मण्डूकः, कच्छपः, मीनः च अनेके जीवाः सन्ति।



**शब्दार्थ–आगच्छतः**=(दो लोग) आते हैं ((two persons) come)


## अभ्यासः


1. चित्रम् ध्यानेन पश्यन्तु, लिखितानि नामानि पठन्तु च।





एते सर्वे पशवः अस्माकं मित्राणि सन्ति।


2. अधुना लिखन्तु एते के?

(क)  एषः........................................................अस्ति।


(ख) एषः.................................................अस्ति। 


(ग)  एषः................................................अस्ति।

(घ) एषः.................................................अस्ति। 

(ङ)  एषः................................................अस्ति।

(च)  एषः..........................................अस्ति।

(छ) एषा..........................................अस्ति। 

(ज)  एषः..........................................अस्ति।

(झ) एषः..........................................अस्ति। 

(ञ)  एषः..........................................अस्ति।

3. **उदाहरणम् पठित्वा रिक्तस्थानानि पूरयन्तु–**

**उदाहरणम्** – यः वृक्षे कूर्दति सः ..........वानरः..........

(क) यः तीव्रं धावति सः ..............................

(ख) यः वनराजः अस्ति सः ..............................

(ग) यः भारं वहति सः ..............................

(घ) यः मरुस्थले सहायकः भवति सः ..............................

(ङ) यः शनैः शनैः चलति सः ..............................


4. **अधोलिखितानि पदानि उचित-स्तम्भे लिखत–**

| | | | | | |
|---|---|---|---|---|---|
| गजः, | सिंहः, | वानरः, | उष्ट्रः, | अश्वः, | व्याघ्रः, |
| भल्लूकः, | गर्दभः, | धेनुः, | अजा, | मूषकः, | विडालः |

| | वनवासिनः पशवः | अन्ये पशवः |
|---|---|---|
| यथा– | ........सिंहः........ | ........मूषकः........ |
| | .......................... | .......................... |
| | .......................... | .......................... |
| | .......................... | .......................... |
| | .......................... | .......................... |
| | .......................... | .......................... |

5. उचित-शब्देन मेलनं कुरुत–


| | | |
|---|---|---|
| (क) | सिंहः | चपलः |
| (ख) | अश्वः | दुग्धप्रियः |
| (ग) | गर्दभः | धावकः |
| (घ) | गजः | स्थूलः |
| (ङ) | कुक्कुरः | भारवाहकः |
| (च) | विडालः | पराक्रमी |
| (छ) | वानरः | स्वामिभक्तः |



6. अधः प्रदत्तस्थाने स्वप्रियपशोः चित्रं रचयित्वा तत् चित्रं वर्णैः रञ्जयन्तु–

चतुर्थः पाठः

# शाकहट्टम्




सुधा – रजत! चित्रे किम् पश्यसि?

रजतः – चित्रे अहम् फलानि पश्यामि।

श्यामा – अत्र कानि फलानि सन्ति?

**रजतः** – अत्र पपीतकः, द्राक्षाफलम्, नारङ्गम्, नारिकेलं च सन्ति।

**रजनीशः** – किम् एतानि एव फलानि सन्ति?

**सुधा** – नहि, तरबूजम्, सेवम्, दाडिमम् इत्यादयः अपि सन्ति।

**श्यामा** – किम् चित्रे केवलं फलानि एव सन्ति?

**रजनीशः** – नहि, तत्र शाकाः अपि सन्ति।

**रजतः** – किम् त्वम् शाकानाम् नामानि अपि जानासि?

**रजनीशः** – आम्, अत्र पुष्पशाकम्, पलाण्डुः, कारवेल्लः, वृन्ताकः, अंगुलितोरिका आलुकम् च इत्यादयः शाकाः सन्ति।

## मिलित्वा गायन्तु, अवगच्छन्तु आचरन्तु च

**अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।**
**चत्वारि तस्य वर्धन्ते आयुर्विद्या यशोबलम्॥**




भावार्थः

यः बालकः प्रतिदिनं मातरं, पितरं, गुरुजनान्, ज्येष्ठान् च नमति, वृद्धानां च सेवां करोति, एतेषाम् आशीर्वादेन तस्य बालकस्य आयुः वर्धते, ज्ञानं वर्धते, यशः वर्धते, शक्तिः च वर्धते।


## अभ्यासः

1. चित्राणि दृष्ट्वा नामानि लिखत–

(क) एतत् ......कदलीफलम्...... अस्ति।




(ख)




एतत् ......द्राक्षाफलम्...... अस्ति।

(ग) एतत् ......नारङ्गम्...... अस्ति।



(घ)




एतत् ......खर्बूजम्...... अस्ति।


(ङ) एतत् ......पपीतकः...... अस्ति।



(च)



एतत् ......आम्रम्...... अस्ति।



(छ) एतत् ......सेवम्...... अस्ति।


2. पञ्चानां फलानां पञ्चानां शाकानाम् च नामानि पाठात् चित्वा लिखन्तु–

| फलानि | शाकाः |
|---|---|
| खर्बूजाम् | अंगुलितोषिका |
| तर्बूजाम् | मूलकम् |
| कदलीफलम् | पुष्पशाकम् |
| द्राक्षाफलम् | पलाण्डुः |
| नारङ्गम् | आलुकम् |

3. भवान् कानि फलानि शाकान् खादति चित्रैः सह तेषां नामानि अधः प्रदत्तस्थाने लिखन्तु–

पञ्चमः पाठः

# अस्माकम् प्रियमित्राणि
## ( पक्षिणः )




**रमा** – राजीव! अस्मिन् चित्रे त्वं किम् पश्यसि?

**राजीवः** – रमे! चित्रे तु अनेके खगाः सन्ति।

**उमा** – किम् त्वम् एतेषां नामानि जानासि?

**उमेशः** – आम्, अत्र मयूरः, बकः, कुक्कुटः च सन्ति।

**रमा** – तत्र शुकः, काकः, उलूकः च अपि सन्ति।

**राजीवः** – किम् चटका हंसः च न स्तः?

**उमा** – आम्, चित्रे चटका हंसः च स्तः। अत्र तु कपोतः पिकः च अपि स्तः।

**उमेशः** – अधुना वद, मयूरः किम् करोति?

**राजीवः** – मयूरः नृत्यति।

**रमा** – बकः कुत्र तिष्ठति?

**उमा** – बकः तु जले तिष्ठति।

**उमेशः** – अन्ये खगाः कुत्र तिष्ठन्ति?

**रमा** – अन्ये खगाः तु वृक्षस्य शाखासु तिष्ठन्ति।

## मिलित्वा गायन्तु, अवगच्छन्तु आचरन्तु च

**न कश्चित् कस्यचित् मित्रं न कश्चित् कस्यचित् रिपुः।**
**व्यवहारेण जायन्ते मित्राणि रिपवस्तथा।।**



**भावार्थः**


संसारे कः अपि जनः अकारणम् एव कस्यचित् मित्रम् अथवा शत्रुः न भवति। जनानां व्यवहारेण एव तेषां मित्राणि शत्रवः च भवन्ति। अतः वयं सर्वैः सह विनम्रतायाः एव व्यवहारं कुर्याम।

## अभ्यासः


1. चित्रं दृष्ट्वा खगस्य नाम लिखत–


(क) एषः ..........काकः.......... अस्ति।



(ख)  एषः ..........मयूरः.......... अस्ति।

(ग) एषः ..........कपोतः.......... अस्ति।




(घ)  एषः ..........शुकः.......... अस्ति।



(ङ) एषः ..........उल्लूकः.......... अस्ति।

(च)  एषः ..........बकः.......... अस्ति।



(छ) एषः ..........हंसः.......... अस्ति।


2. मेलनं कुरुत–


(क) शुकः श्वेतः

(ख) बकः कृष्णः

(ग) काकः हरितः

3. उदाहरणानुसारं शब्दनिर्माणं कुरुत–




4. खगानां नामानि लिखत येषाम् अन्ते 'कः' वर्णः भवति–

(क) ........पिकः........

(ख) ........काकः........

(ग) ........शुकः........

(घ) ........बकः........



5. **पाठे प्रदत्तं चित्रं दृष्ट्वा रिक्तस्थानानि पूरयत–**



(क) ........मयूरः........ नृत्यति।

(ख) ........पिकः........ मधुरं गायति।

(ग) ........चटका........ कूजति।

(घ) ........शुकः........ मरीचिकाम् खादति।

(ङ) ........हंसः........ जले तरति।

(च) ........उलूकः........ रात्रौ जागर्ति।


(छ) ........बकः........ मत्स्यं खादति।

H.W

6. **कस्यापि पक्षिणः चित्रम्/चित्राणि रचयित्वा तत्/तानि वर्णैः रञ्जयन्तु–**

षष्ठः पाठः

# ये फलानि खादन्ति ते सुखिनः वसन्ति



एषा सुधा अस्ति।

सुधा किम् करोति?

सुधा **प्रातराशे** सेवफलं **खादति**।



एषः रजतः अस्ति।

रजतः किम् करोति?

रजतः प्रातःकाले कदलीफलं खादति।



एषा श्यामा अस्ति।

श्यामा किम् करोति?

श्यामा प्रातःकाले आम्रफलं खादति।



एषा लता अस्ति।

लता किम् करोति?


लता **मध्याह्ने** खर्बूजं खादति।

**शब्दार्थ–प्रातराशे**=नाश्ते में (at the time of breakfast), **खादति**=खाता है/खाती है ((he/she) eats), **मध्याह्ने**=दोपहर में (at noon)

एषः रजनीशः अस्ति।

रजनीशः किम् करोति?

रजनीशः मध्याह्ने दाडिमफलं खादति।





एषा दीपाली अस्ति।

दीपाली किम् करोति?


दीपाली मध्याह्ने तरबूजफलं खादति।

त्वम् मध्याह्ने किम् पिबसि?

**अहम्** मध्याह्ने नारिकेलजलं **पिबामि**।



**वयम् सर्वे सायंकाले फलानाम् रसम् पिबामः। सुखिनः वसामः।**



**शब्दार्थ–अहम्**=मैं (I), **पिबामि**=पीता हूँ/पीती हूँ ((I) drink)

## अभ्यासः

1. अस्माकम् आहारे फलानाम् महत्त्वम् अस्ति। फलानाम् रसेन वयं स्वस्थाः भवामः। भवान्/भवती वदतु लिखतु च यत् कदा किं खादति पिबति च।


   (क) ........अहम् प्रातःकाले दुग्धम् पिबामि।........

   (ख) ............................................................


   (ग) ............................................................

   (घ) ............................................................

2. चित्राणि दृष्ट्वा मञ्जूषायाः चित्वा लिखन्तु कः कालः?




(क) प्रातः कालः



(ख) सायंकालः



(ग) रात्रिकालः



(घ) मह्याह्नकालः

**मञ्जूषा**

रात्रिकालः, प्रातःकालः, मध्याह्नकालः, सायंकालः

3. उदाहरणं दृष्ट्वा रिक्तस्थानानि पूरयन्तु–

(अ) उदाहरणम्–

त्वम् पठसि (पठ्)
युवाम् पठथः
यूयम् पठथ

(क) त्वम् हससि। (हस्)
युवाम् हसथः।
यूयम् हसथ।

(ख) त्वम् क्रीडसि। (क्रीड)
युवाम् क्रीडथः।
यूयम् क्रीडथ।

(ग) त्वम् भ्रमसि। (भ्रम्)
युवाम् भ्रमथः।
यूयम् भ्रमथ।

(घ) त्वम् चलसि। (चल्)
युवाम् चलथः।
यूयम् चलथ।

(ङ) त्वम् लिखसि। (लिख्)
युवाम् लिखथः।
यूयम् लिखथ।

(च) त्वम् वदसि। (वद्)
युवाम् वदथः।
यूयम् वदथ।

(छ) त्वम् नमसि। (नम्)
युवाम् नमथः।
यूयम् नमथ।

(आ) मञ्जूषातः उचितं पदं चित्वा रिक्तस्थानानि पूरयत–

**मञ्जूषा**

यूयम्, त्वम्, युवाम्, युवाम्, यूयम्, त्वम्

(क) त्वम् गच्छसि।
युवाम् खादथः।
यूयम् धावथ।

(ख) त्वम् चलसि।
युवाम् कूर्दथः।
यूयम् भ्रमथ।

सप्तमः पाठः

# चित्रप्रदर्शनी

**रमा** – रमेश! अद्य रविवासरे भवान् कुत्र गच्छति?

**रमेशः** – रमे! अहम् विद्यालयम् गच्छामि।


**रमा** – किम् भवतः विद्यालये अद्य अवकाशः न अस्ति?

**रमेशः** – अवकाशः तु अस्ति परन्तु अद्य मम विद्यालये संस्कृतस्य चित्रप्रदर्शनी अस्ति।

**रमा** – किम् संस्कृतस्य चित्रप्रदर्शनी अस्ति! अहम् अपि द्रष्टुम् इच्छामि।

**रमेशः** – अवश्यम् आगच्छतु।

**( विद्यालयम् गत्वा )**




**रमेशः** – पश्यतु एतानि चित्राणि नामानि अपि च वदतु।

**रमा** – आम्, वदामि। एतत् पुष्पम्, एषः वृक्षः, पादपः, विमानम्, संगणकम् अपि अस्ति। सर्वाणि चित्राणि सुन्दराणि सन्ति। भवतः विद्यालयः अपि सुन्दरः अस्ति।

**रमेशः** – धन्यवादः। आगच्छ अधुना चलावः।

## अभ्यासः

1. विद्यालये अनेकानि चित्राणि सन्ति। एतेषाम् नामानि संस्कृतेन अत्र लिखन्तु–

................................ ................................ ................................

................................ ................................ ................................

................................ ................................ ................................

................................ ................................


2. अत्र विभिन्नचित्राणि सन्ति। मञ्जूषायाम् नामानि अपि लिखितानि सन्ति। एतेभ्यः उचितपदम् चित्वा चित्राणाम् अधः लिखन्तु–

**मञ्जूषा**


व्यजनम्, पुस्तकम्, दूरदर्शनम्, गृहम्, कन्दुकम्,
नौका, दीपकः, पर्वतः, वृक्षः, कृषकः



(क) ..............................



(ख) ..............................



(ग) ..............................




(घ) ..............................




(ङ) ..............................




(च) ..............................



(छ) ..............................



(ज) ..............................



(झ) ..............................



(ञ) ..............................

**3. प्रश्नान् पठित्वा वदन्तु लिखन्तु च 'आम्' अथवा 'न'–**

**उदाहरणम् –** किम् रमेशः विद्यालयम् गच्छति? ..........आम्..........

(क) किम् विद्यालयः सुन्दरः अस्ति? ..............................

(ख) किम् विद्यालये विज्ञानस्य चित्रप्रदर्शनी अस्ति? ..............................

(ग) किम् चित्राणि सुन्दराणि सन्ति? ..............................

(घ) किम् सर्वासु कक्षासु चित्राणि सन्ति? ..............................

(ङ) किम् रमेशः ग्रामं गच्छति? ..............................

**अष्टमः पाठः**

# अभिनवः किम् किम् करोति?



एषः अभिनवः अस्ति।



अभिनवः प्रातःकाले शीघ्रम् उत्तिष्ठति।




प्रातः **उत्थाय** सः उद्याने **भ्रमति धावति च**।



भ्रमणं कृत्वा गृहम् आगच्छति। **दन्तधावनम्** करोति। स्नानम् करोति।

फलानि खादति, दुग्धम् च पिबति।



**शब्दार्थ–उत्थाय**=उठकर (after getting up), **भ्रमति**=घूमता है/घूमती है ((he/she) walks), **धावति**=भागता है/भागती है ((he/she) runs), **च**=और (and), **दन्तधावनम्**=दाँत साफ़ करना (brushing teeth)

सः बसयानेन विद्यालयम् गच्छति। विद्यालये सर्वप्रथमम् ईशप्रार्थनाम् करोति, यज्ञम् करोति।










सः मित्रैः सह विद्यालये पठति, लिखति **क्रीडति** च।

**एकवादने** अवकाशः भवति।






सः गृहम् आगच्छति भोजनम् करोति शयनम् च करोति।





सायंकाले क्रीडति गृहकार्यम् च करोति।



रात्रौ भोजनम् करोति। उद्याने **शनैः शनैः** भ्रमति। दन्तधावनम् करोति। **दशवादने** शयनम् करोति।







**शब्दार्थ–क्रीडति**=खेलता है/खेलती है ((he/she) plays), **एकवादने**=एक बजे (1:00 p.m.), **शनैः शनैः**=धीरे-धीरे (slowly and steadily), **दशवादने**=दस बजे (10:00 p.m.)

## अभ्यासः

**1. प्रश्नान् पठित्वा वदन्तु लिखन्तु च 'आम्' अथवा 'न'–**

**उदाहरणम्**–किम् अभिनवः प्रातःकाले शीघ्रम् उत्तिष्ठति? ..........आम्..........

(क) किम् अभिनवः प्रातःकाले भ्रमणाय गच्छति? ..............................

(ख) किम् अभिनवः उद्याने धावति? ..............................

(ग) किम् अभिनवः प्रातः भ्रमणात् पूर्वम् स्नानम् करोति? ..............................

(घ) किम् अभिनवः प्रातः दुग्धम् अपि पिबति? ..............................

(ङ) किम् अभिनवः विद्यालयम् रेलयानेन गच्छति? ..............................

(च) किम् अभिनवः विद्यालये मित्रैः सह क्रीडति? ..............................

(छ) किम् अभिनवः विद्यालये मित्रैः सह केवलम् क्रीडति? ..............................

(ज) किम् अभिनवः सायंकाले अपि क्रीडति? ..............................

(झ) किम् अभिनवः उद्याने शनैः शनैः भ्रमति? ..............................

(ञ) किम् अभिनवः रात्रौ अपि दन्तधावनम् करोति? ..............................

**2. स्वविषये लिखन्तु 'आम्' अथवा 'न'–**

(क) किम् भवान्/भवती प्रातःकाले शीघ्रम् उत्तिष्ठति? ..............................

(ख) किम् भवान्/भवती भ्रमणाय गच्छति? ..............................

(ग) किम् भवान्/भवती प्रतिदिनम् स्नानम् करोति? ..............................

(घ) किम् भवान्/भवती विद्यालये ईशप्रार्थनाम् करोति? ..............................

(ङ) किम् भवान्/भवती सायंकाले क्रीडति? ..............................


(च) किम् भवान्/भवती भोजनपश्चात् भ्रमति? ..............................


(छ) किम् भवान्/भवती रात्रौ दन्तधावनम् करोति? ..............................


3. **घटिकाम् दृष्ट्वा समयम् संस्कृतेन लिखन्तु–**


उदाहरणम्–  (10:30) ........सार्ध–दशवादनम्........

(क)  (9:30) ..............................................

(ख)  (6:00) ..............................................

(ग)  (12:15) ......सपाद–द्वादशवादनम्......

(घ)  (5:00) ..............................................

(ङ)  (4:15) ..............................................

4. **उचितमेलनम् कुर्वन्तु–**

| | |
|---|---|
| (क) 3:00 | सार्ध-षड्वादनम् |
| (ख) 12:30 | सपाद-अष्टवादनम् |
| (ग) 8:15 | सपाद-एकादशवादनम् |
| (घ) 6:30 | सार्ध-द्वादशवादनम् |
| (ङ) 11:15 | त्रि-वादनम् |

5. **मञ्जूषातः उचितं समयवाचकं पदं चित्वा रिक्तस्थानानि पूरयन्तु पठन्तु च यत् अनुभवः कतिवादने किं करोति–**

**मञ्जूषा**

द्विवादने, सपाद-सप्तवादने, सार्धपञ्चवादने,
षड्वादने, सप्तवादने

(क) अनुभवः प्रातः .............................. उत्तिष्ठति।

(ख) सः .............................. व्यायामं करोति।


(ग) .............................. प्रातराशं करोति।

(घ) सः .............................. विद्यालयं गच्छति।

(ङ) अनुभवः अपराह्णे .............................. गृहम् आगच्छति।

नवमः पाठः

# विडालः कुत्र अस्ति?



विडालः पेटिकायाः **उपरि** तिष्ठति।



विडालः पेटिकायाः **नीचैः** अस्ति।



विडालः पेटिकायाः **अन्तः** अस्ति।




विडालः पेटिकायाः **बहिः** **निर्गच्छति**।



विडालः पेटिकायाः **समीपे** अस्ति।



विडालः पेटिकायाः **दूरे** तिष्ठति।




विडालः पेटिकायाः **कोणे** तिष्ठति।

**शब्दार्थ–निर्गच्छति**=बाहर जाता है/जाती है ((he/she/it) goes out)

## अभ्यासः

**1. रिक्तस्थानानि पूरयन्तु–**

(क) मूषकः आसन्दिकायाः ............... अस्ति।





(ख) वानरः वृक्षस्य शाखायाः ............... अस्ति।

(ग) बालः गृहात् ............... खेलति।





(घ) सुनीलः बसयानस्य ............... अस्ति।

(ङ) रमा गृहस्य ............... तिष्ठति।



**2. एतेषु वाक्येषु अव्ययपदानि चित्वा लिखन्तु–**

(क) अमितः गृहात् **बहिः** गच्छति। ..............................

(ख) सः वृक्षस्य **समीपे** गच्छति। ..............................

(ग) तदा एकः वानरः वृक्षस्य **उपरि** आगच्छति। ..............................

(घ) सः फलानि **नीचैः** क्षिपति। ..............................

(ङ) फलम् अमितस्य **उपरि** पतति। ..............................

(च) तदा सः **दूरे** धावति। ..............................

**3. मञ्जूषातः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयन्तु–**

**मञ्जूषा**

नीचैः, दूरे, उपरि, अन्तः, बहिः, समीपे

(क) दिल्लीनगरस्य .............................. यमुनानदी वहति।

(ख) वायुयानम् मेघानाम् .............................. उत्पतति।

(ग) छात्राः विद्यालयात् .............................. आगच्छन्ति।

(घ) शिमलानगरम् आगरानगरात् .............................. अस्ति।

(ङ) जलं सदा .............................. एव वहति।

(च) छात्राः कक्षायाः .............................. उपविशन्ति।

दशमः पाठः

# आगच्छ! गायामः

चलामि मार्गे जले तरामि,
क्रीडामि क्षेत्रे सदा हसामि।
पठामि गेहे कथां शृणोमि,
नद्याः तीरे अहं भ्रमामि।।





एषः हस्तः **दक्षिणः** हस्तः,
एषः **वामः** हस्तः।
एषः पादः दक्षिणपादः,
एषः वामः पादः।।

मेघः गर्जति पतति च जलम्,
पृच्छति बालः गच्छति कः अयम्।
गच्छति हस्ती **पातुम्** जलम्,
रक्षति जननी अङ्के बालम्।।



**शब्दार्थ–दक्षिणः**=दायाँ (right), **वामः**=बायाँ (left), **पातुम्**=पीने के लिए (to drink)

## अभ्यासः

1. **पाठम् पठित्वा प्रश्नानाम् उत्तराणि लिखन्तु–**

(क) अहम् कुत्र चलामि? ..................अहम् मार्गे चलामि।..................

(ख) अहम् कुत्र तरामि? ....................................................................

(ग) अहम् कुत्र भ्रमामि? ....................................................................

(घ) अहम् **किम्** शृणोमि? ....................................................................

(ङ) अहम् **कदा** हसामि? ....................................................................

(च) कः गर्जति? ....................................................................


(छ) किम् पतति? ....................................................................

(ज) कः गच्छति? ....................................................................

(झ) जननी कम् रक्षति? ....................................................................

(ज) जननी बालकम् कुत्र रक्षति? ....................................................................

2. **चित्रम् दृष्ट्वा रिक्तस्थानानि पूरयत–**



एषः ...................... हस्तः। एषः ...................... हस्तः।

एषः ...................... पादः। एषः ...................... पादः।

---

**शब्दार्थ–किम्**=क्या (what), **कदा**=कब (when)

3. कः किम् करोति?

(क) छात्रः ........................................।



(ख)



श्रुतिः ........................................।



(ग) नरः ........................................।

(घ)



बालकः ........................................।

(ङ) बालकः ........................................।



(च) वानरः .......................................।




(छ)



शुकः .......................................।

(ज) मयूरः .......................................।






(झ) कृषकः .......................................।

एकादशः पाठः


# हरिणम् मा मारय!





अत्र एकः हरिणः अस्ति। हरिणः वने भ्रमति। हरिणः वृक्षस्य नीचैः घासम् खादति। एकः **शवरः** तत्र आगच्छति। हरिणः शवरम् पश्यति। हरिणः दूरे धावति। शवरः हरिणम् मारयितुम् इच्छति। तदैव एकः बालकः तत्र आगच्छति। बालकः शवरस्य समीपे गच्छति कथयति च। हरिणम् **मा** मारय। अहम् हरिणम् पालयामि। एषः हरिणः **अतिसरलः** अस्ति। एषः अतिप्रियः अस्ति।


**शब्दार्थ–शवरः**=शिकारी (hunter), **मा**=मत (do not), **अतिसरलः**= बहुत भोला (innocent)



शवरः बालकस्य वचनम् **शृणोति**। शवरस्य हृदये दया उत्पन्ना भवति। सः हरिणम् न मारयति। बालकः प्रसन्नः भवति। सः हरिणे स्नेहम् करोति। हरिणः अपि बालके स्नेहम् करोति।

## मिलित्वा गायन्तु, अवगच्छन्तु आचरन्तु च

**नमन्ति फलिनो वृक्षाः नमन्ति गुणिनो जनाः।**
**शुष्कवृक्षाश्च मूर्खाश्च न नमन्ति कदाचन॥**



**भावार्थः**

फलयुक्तानां वृक्षाणां शाखाः विनताः भवन्ति। येषु जनेषु सर्वान् जीवान् प्रति दया, परोपकारः, सहनशीलता, मधुरभाषणम् आदयः गुणाः भवन्ति, ते स्वभावेन विनम्राः भवन्ति। अतः वयम् अपि गुणयुक्ताः विनम्राः च भवेम।

**शब्दार्थ–शृणोति**=सुनता है/सुनती है [(he/she) listens]

## अभ्यासः

**1. उत्तराणि लिखन्तु–**

(क) हरिणः किम् खादति? ..........................................................

(ख) कः तत्र आगच्छति? ..........................................................

(ग) हरिणः **कीदृशः** भवति? ..........................................................

(घ) शवरस्य समीपे कः आगच्छति? ..........................................................

**2. कथाम् क्रमानुसारम् योजयन्तु–**

(क) एकः शवरः आगच्छति।


(ख) हरिणः घासम् खादति।

(ग) हरिणः दूरे धावति।

(घ) अहम् हरिणम् पालयामि।

(ङ) बालकः शवरम् कथयति।

(च) शवरः हरिणम् न मारयति।



(क) ..........................................................

(ख) ..........................................................

(ग) ..........................................................

(घ) ..........................................................

(ङ) ..........................................................

(च) ..........................................................

शब्दार्थ–**कीदृशः**=कैसा (of what nature)

3. **प्रश्नानाम् उत्तराणि इति वदन्तु लिखन्तु च 'आम्' अथवा 'न'–**

(क) किम् हरिणः फलं खादति? ..........................................

(ख) किम् शवरः अन्ते हरिणम् मारयति? ..........................................

(ग) किम् हरिणः बालके स्नेहम् करोति? ..........................................

(घ) किम् हरिणः ग्रामे भ्रमति? ..........................................

(ङ) किम् हरिणः अतिप्रियः अस्ति? ..........................................

4. **मञ्जूषातः क्रियापदानि चित्वा रिक्तस्थानानि पूरयत–**

**मञ्जूषा**

मारयति, गच्छति, कथयति, खादति, आगच्छति

(क) बालकः शवरस्य समीपम् ..........................................।

(ख) हरिणः घासम् ..........................................।

(ग) एकः शवरः तत्र ..........................................।

(घ) बालकः शवरम् ..........................................।

(ङ) शवरः हरिणम् न ..........................................।

5. **मञ्जूषातः उचितं पदं चित्वा कथां पूरयन्तु–**

**मञ्जूषा**

मारयितुम्, पालयामि, दया, शवरः,
आगच्छति, मारय, भ्रमति


वने एकः हरिणः ..............................। तत्र एकः .............................. आगच्छति। शवरः हरिणम् .............................. इच्छति। तदैव हरिणस्य रक्षकः एकः बालक तत्र ..............................। बालकः शवरं कथयति। अहम् हरिणम् ..............................। अतः हरिणम् मा ..............................। शवरस्य हृदये .............................. उत्पन्ना भवित। सः हरिणं न मारयति।

द्वादशः पाठः

# कथयन्तु! कस्य कः वर्णः?







अध्यापकः – श्रुते! भवती कम् पश्यति?

श्रुतिः – अहम् शुकम् पश्यामि।

अध्यापकः – श्रुते! शुकस्य **वर्णः** कः?

श्रुतिः – हरितः।

अध्यापकः – अनुज! वदतु अन्ये के के हरितवर्णाः भवन्ति?

अनुजः – घासम्, पत्रम्, तरबूजम् आदयः हरितवर्णाः भवन्ति।

अध्यापकः – मानव! शुकस्य चञ्चुम् पश्यतु। **अस्य** कः वर्णः?

मानव – अस्य रक्तवर्णः। **जपापुष्पम्** अपि रक्तवर्णस्य भवति।

अध्यापकः – स्मृते! काकस्य वर्णः कः?

स्मृतिः – कृष्णः।

अध्यापकः – वैभव! काकसदृशाः अन्ये के?

वैभवः – पिकः, भल्लूकः, महिषी, भ्रमरः आदयः कृष्णवर्णाः सन्ति।

अध्यापकः – साधु! कृते! के के श्वेतवर्णाः भवन्ति?


कृतिः – हंसः, बकः शशकः च श्वेताः भवन्ति।

**शब्दार्थ–वर्णः**=रंग (colour), **अस्य**=इसका (its), **जपापुष्पम्**=गुडहल (hibiscus)

| | | |
|---|---|---|
| अध्यापकः | – | रजत! गगनस्य वर्णः कः? |
| रजतः | – | गगनस्य वर्णः नीलः भवति। सागरजलम् अपि नीलवर्णस्य भवति। |
| अध्यापकः | – | आकृते! कस्य वर्णः केसरः भवति? |
| आकृतिः | – | नारङ्गम् केसरवर्णस्य भवति। आर्य समाजस्य ध्वजः अपि केसरवर्णस्य भवति। |
| अध्यापकः | – | ध्रुव! चमेलीपुष्पस्य वर्णः कः? |
| ध्रुवः | – | अस्य पीतवर्णः। करवीरम् (कनेर) अपि पीतवर्णस्य भवति। |
| अध्यापकः | – | पाटिलपुष्पस्य कः वर्णः? |
| देवेशः | – | पाटिलपुष्पस्य वर्णः पाटिलः भवति। |
| अध्यापकः | – | **साधु** देवेश! बालाः **अधुना** भवन्तः **अवगच्छन्ति** के मुख्याः वर्णाः भवन्ति। |







**शब्दार्थ–साधु**=अच्छा/ठीक है (o.k./all right), **अधुना**=अब (now), **अवगच्छन्ति**=समझते हैं/समझती हैं (they understand)


## अभ्यासः

1. चित्रम् दृष्ट्वा अधोलिखितानाम् प्रश्नानाम् उत्तराणि लिखन्तु–

(क) एतस्य पुष्पस्य किम् नाम?
एतस्य पुष्पस्य नाम ……………………… अस्ति।
अस्य कः वर्ण?
अस्य वर्णः ……………………… अस्ति।



(ख)




एषः कः?
एषः ……………………… अस्ति।
अस्य कः वर्णः?
अस्य वर्णः ……………………… अस्ति।

(ग) एषः कः?
एषः ……………………… अस्ति।
अस्य कः वर्ण?
अस्य वर्णः ……………………… अस्ति।




(घ)



एतत् किम्?
एतत् ……………………… अस्ति?
अस्य कः वर्णः?
अस्य वर्णः ……………………… अस्ति।

(ङ) एतत् किम्?
एतत् ……………………… अस्ति?
अस्य कः वर्णः?
अस्य वर्णः ……………………… अस्ति?



2. मेलनं कुर्वन्तु–

अ

(क) रक्तवर्णः
(Red)

(ख) पीतवर्णः
(Yellow)

(ग) हरितवर्णः
(Green)


(घ) नीलवर्णः
(Blue)


(ङ) पाटिलवर्णः
(Pink)

(च) केसरवर्णः
(Orange)

(छ) कृष्णवर्णः
(Black)

ब






3. चित्रम् दृष्ट्वा रिक्तस्थानानि पूरयन्तु–



(क) कः नारिकेलजलं पिबति?
.................. पिबति।



(ख) कः वर्षति?
.............................. वर्षति।




(ग) कः प्रकाशं यच्छति?
.................. यच्छति।



(घ) आकाशे कः उड्डयति?
........................ उड्डयति।




(ङ) वृक्षात् किम् पतति?
.................. पतति।




(च) कः कर्षति?
.............................. कर्षति।


4. चित्राणि विविधैः वर्णैः रञ्जयन्तु नामानि च लिखन्तु–




(क) ........................................




(ख) ........................................



(ग) ........................................



(घ) ........................................



(ङ) ........................................

त्रयोदशः पाठः

# कः चतुरः अस्ति?

एतत् सुन्दरम् उद्यानम् अस्ति। अत्र अनेके वृक्षाः पादपाः च सन्ति। उद्याने पुष्पाणि विकसन्ति। अत्र अनेके पशु-पक्षिणः निवसन्ति। अत्र एकः विशालः वटवृक्षः अस्ति। अस्मिन् वटवृक्षे एकः काकः एकः कपोतः च वसतः। कपोतः अतिसरलः अस्ति। काकः कपोतम् पीडयति।

**एकदा** कपोतः एकाम् पूरिकाम् स्वकोटरे स्थापयति। काकः बलेन पूरिकाम् नीत्वा खादति। **तदा** एव एकः बुभुक्षितः कुक्कुरः आगच्छति। सः काकम् कथयति-काकराज! तव स्वरः अतीव मधुरः अस्ति। एकम् गीतम् गाय। काकः स्वप्रशंसाम् श्रुत्वा प्रसन्नः भवति। यदा सः गीतम् गायति तदा पूरिका **अधः पतति**। चतुरः कुक्कुरः पूरिकाम् खादति, हसति धावति च। मूर्खः काकः लज्जितः भवति।






**शब्दार्थ—एकदा**=एक बार (once), **तदा**=तब (then), **अधः**=नीचे (down), **पतति**=गिरता है/गिरती है (falls)

## अभ्यासः

**1. मेलनम् कुर्वन्तु–**

| 'अ' | 'आ' |
|---|---|
| (क) सिंहः |  |
| (ख) शशकः |  |
| (ग) हंसः |  |
| (घ) बकः |  |

**2. कोष्ठकात् चित्वा उत्तराणि लिखन्तु–**

(क) बुभुक्षितः कः अस्ति? .......................................... (कुक्कुरः/काकः)

(ख) कः अतिसरलः अस्ति? .......................................... (काकः/कपोतः)

(ग) गीतम् कः गायति? .......................................... (कपोतः/काकः)

(घ) किम् सुन्दरम् अस्ति? .......................................... (उद्यानम्/वृक्षः)

(ङ) कः विशालः अस्ति? .................................................. (वटवृक्षः/काकः)

(च) चतुरः कः अस्ति? .................................................. (काकः/कुक्कुरः)

(छ) बलेन पूरिकाम् कः खादति? .................................................. (कपोतः/काकः)

(ज) पूरिका कुत्र पतति? .................................................. (अधः/उपरि)

3. **रिक्तस्थानानि पूरयन्तु–**

(क) उद्याने .................................................. विकसन्ति।

(ख) कुक्कुरः .................................................. कथयति।

(ग) काकः स्वप्रशंसाम् श्रुत्वा .................................................. भवति।

(घ) मूर्खः काकः .................................................. भवति।



4. **कथाम् क्रमानुसारम् लिखन्तु–**

(क) कुक्कुरः आगच्छति।

(ख) काकः वृक्षे तिष्ठति।

(ग) काकः गीतम् गायति।

(घ) पूरिका मुखात् पतति।

(ङ) कुक्कुरः धावति।

(क) ..................................................................................................

(ख) ..................................................................................................


(ग) ..................................................................................................

(घ) ..................................................................................................


(ङ) ..................................................................................................

**चतुर्दशः पाठः**

# कति वस्तूनि सन्ति?




एषः **एकः** विद्यालयः अस्ति। विद्यालये **एकम्** उद्यानम् अस्ति। विद्यालयस्य उद्याने **द्वौ** विशालवृक्षौ स्तः। उद्याने **त्रयः** वानराः वृक्षेषु सदैव कूर्दन्ति, **चत्वारः** मयूराः नृत्यन्ति, **पञ्च** कोकिलाः कूजन्ति। एकस्मिन् वृक्षे **षट्** आम्राणि सन्ति। अन्यस्मिन् वृक्षे **सप्त** आम्राणि सन्ति। **अष्ट** शुकाः आम्राणि खादन्ति। **नव** पुष्पाणि विकसन्ति। **दश** पत्राणि पतन्ति।




## अभ्यासः

1. लिखन्तु कति वस्तूनि सन्ति? सङ्ख्याशब्दाः अधः मञ्जूषायां लिखिताः सन्ति।








(क) ........................ फलम्। (ख) ........................ पुस्तके। (ग) ........................ वस्त्राणि।





(घ) ........................ सिंहः। (ङ) ........................ अश्वौ। (च) ........................ स्यूताः।






(छ) ........................ माला। (ज) ........................ माले। (झ) ........................ मालाः।


**मञ्जूषा**

एकम्, द्वौ, त्रीणि, एकः, द्वे, तिस्रः, एका, द्वे, त्रयः

2. **मञ्जूषातः उचितं सङ्ख्याशब्दं चित्वा रिक्तस्थानानि पूरयन्तु–**



(क) ........................ पुस्तकानि।




(ख) ............................ चटकाः।



(ग) .................................. वृक्षाः।



(घ) .......................... घटिकाः।




(ङ) ......................... पुष्पाणि।




(च) ............................... मूषकाः।




(छ) ........................... शुकाः।




(ज) ..................... कन्दुकानि।



(झ) ................................आम्राणि।



(ञ) ............................ सेवफलानि।



(ट) ..................... दीपकाः।

**मञ्जूषा**

चत्वारः, पञ्च, अष्ट, नव, दश, सप्त, चतस्रः, चत्वारि, षट्

3. उचितं सङ्ख्यावाचकं पदं चित्वा लिखन्तु–

| | |
|---|---|
| 11 ........................................ | 12 ........................................ |
| 13 ........................................ | 14 ........................................ |
| 15 ........................................ | 16 ........................................ |
| 17 ........................................ | 18 ........................................ |
| 19 ........................................ | 20 ........................................ |

| | |
|---|---|
| एकादश | अष्टादश |
| पञ्चदश | त्रयोदश |
| सप्तदश | नवदश |
| विंशतिः | चतुर्दश |
| द्वादश | षोडश |

4. उचितं सङ्ख्यावाचकं पदं चित्वा रिक्तस्थानानि पूरयन्तु–

(क) सूर्यः ................................................ अस्ति। (एकः/एकम्)

(ख) वेदाः ................................................ सन्ति। (चतस्रः/चत्वारः)

(ग) वर्षे ................................................ मासाः भवन्ति। (द्वादशाः/द्वादश)

(घ) मनुष्यस्य ................................................ नेत्रे भवतः। (द्वे/द्वौ)

(ङ) उद्याने ................................................ कन्याः क्रीडन्ति। (त्रयः/तिस्रः)

# सङ्ख्या

**उच्चैः पठत अवगच्छत रिक्तस्थानेषु लिखत च–**

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| 1 | १ | एकम् | ................................ | 19 | १९ | नवदश | ................................ |
| 2 | २ | द्वे | ................................ | 20 | २० | विंशतिः | ................................ |
| 3 | ३ | त्रीणि | ................................ | 21 | २१ | एकविंशतिः | ................................ |
| 4 | ४ | चत्वारि | ................................ | 22 | २२ | द्वाविंशतिः | ................................ |
| 5 | ५ | पञ्च | ................................ | 23 | २३ | त्रयोविंशतिः | ................................ |
| 6 | ६ | षट् | ................................ | 24 | २४ | चतुर्विंशतिः | ................................ |
| 7 | ७ | सप्त | ................................ | 25 | २५ | पञ्चविंशतिः | ................................ |
| 8 | ८ | अष्ट | ................................ | 26 | २६ | षड्विंशतिः | ................................ |
| 9 | ९ | नव | ................................ | 27 | २७ | सप्तविंशतिः | ................................ |
| 10 | १० | दश | ................................ | 28 | २८ | अष्टाविंशतिः | ................................ |
| 11 | ११ | एकादश | ................................ | 29 | २९ | नवविंशतिः | ................................ |
| 12 | १२ | द्वादश | ................................ | 30 | ३० | त्रिंशत् | ................................ |
| 13 | १३ | त्रयोदश | ................................ | 31 | ३१ | एकत्रिंशत् | ................................ |
| 14 | १४ | चतुर्दश | ................................ | 32 | ३२ | द्वात्रिंशत् | ................................ |
| 15 | १५ | पञ्चदश | ................................ | 33 | ३३ | त्रयस्त्रिंशत् | ................................ |
| 16 | १६ | षोडश | ................................ | 34 | ३४ | चतुस्त्रिंशत् | ................................ |
| 17 | १७ | सप्तदश | ................................ | 35 | ३५ | पञ्चत्रिंशत् | ................................ |
| 18 | १८ | अष्टादश | ................................ | 36 | ३६ | षट्त्रिंशत् | ................................ |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| 37 | ३७ | सप्तत्रिंशत् | ................................ | 44 | ४४ | चतुश्चत्वारिंशत् | ................................ |
| 38 | ३८ | अष्टात्रिंशत् | ................................ | 45 | ४५ | पञ्चचत्वारिंशत् | ................................ |
| 39 | ३९ | नवत्रिंशत् | ................................ | 46 | ४६ | षट्चत्वारिंशत् | ................................ |
| 40 | ४० | चत्वारिंशत् | ................................ | 47 | ४७ | सप्तचत्वारिंशत् | ................................ |
| 41 | ४१ | एकचत्वारिंशत् | ................................ | 48 | ४८ | अष्टचत्वारिंशत् | ................................ |
| 42 | ४२ | द्विचत्वारिंशत् | ................................ | 49 | ४९ | नवचत्वारिंशत् | ................................ |
| 43 | ४३ | त्रिचत्वारिंशत् | ................................ | 50 | ५० | पञ्चाशत् | ................................ |

## मिलित्वा गायन्तु, अवगच्छन्तु आचरन्तु च


**पुस्तकस्था तु या विद्या परहस्ते च यद् धनम्।**
**कार्यकाले समायाते, न सा विद्या न तद् धनम्॥**



**भावार्थः**

यदि कस्य अपि समीपे पुस्तकानि तु अनेकानि सन्ति परन्तु सः पठति न, कस्यापि समीपे धनं तु अस्ति परन्तु तत् अन्यस्य हस्ते अस्ति, तदा आवश्यकतायां तस्य धनस्य विद्यायाः च कः अपि लाभः न भवति।

# इदम् अस्माकं शरीरम्




**शरीराङ्गनां नामानि सङ्ख्यां च लिखत—**

| वर्णः | | अङ्गनाम | कति |
|---|---|---|---|
| यथा—क | = | कण्ठः | एकः |
| शि | = | | |
| ना | = | | |
| न | = | | |
| क | = | | |
| चि | = | | |
| स | = | | |
| उ | = | | |
| भु | = | | |
| ऊ | = | | |
| ज | = | | |
| पा | = | | |
| ल | = | | |
| अ | = | | दश |
| ह | = | | |
| म | = | मणिबन्धः | द्वौ |
| कू | = | | |
| व | = | | |
| मु | = | | |
| ने | = | | |
| के | = | | |